शि॰को॰ । तथा च प्रत्यवायप्रयोजकाभावप्रतियोगि निमन्त्रणम् । “ब्राह्मणप्रातिवेश्यानामेतदेवा निमन्त्रणे” याज्ञ॰ “निमन्त्रणार्थं दूतांश्च प्रेषयामास शीघ्रगान्” भा॰व॰ २५५अ॰ । श्राद्धनिमन्त्रणप्रकारादि निमन्त्रितस्य नियमादि च नि॰सि॰ निरूपितं यथा चन्द्रिकायां मात्स्ये “पठन्निमन्त्र्य नियमान् श्रावयेत् पैतृकान् बुधः । अक्रोधनैः शौचपरैः सततं ब्रह्मचारिभिः । भवितव्यं भवद्भिश्च मया च श्राद्धकारिणा” यत्तु मनुः “सर्वायासविनिर्मुक्तैः कामक्रोधविवर्जितैः । भवितव्यं भवद्भिर्नः श्वोभूते श्राद्धकर्मणीति” तत्पूर्वेद्युर्निमन्त्रणपरं न तदहः । तत्रैव देवलः “असम्भवे परेद्युर्वा ब्राह्मणांस्तान्निमन्त्रयेत् । अस्नातीनसमानार्षानयुग्मानात्मशक्तितः” । कात्यायनः “अनिन्द्येनामन्त्रितो नापक्रामेत् केतनं गृह्यसक्तः” । अथ श्राद्धकर्तृभोक्तृनियमाः तत्र निमन्त्रितविप्रत्यागेऽपरार्के यमः “केतनं कारयित्वा तु योऽतिपातयति द्विजम् । ब्रह्महत्यामवाप्नोति शूद्रयोनौ च जायते । आमन्त्र्य ब्राह्मणं यस्तु यथान्यायं न पूजयेत् । अतिकृच्छ्रासु घोरासु तिर्य्यग्योनिषु जायते” । प्रमदात्त्यागे हारीतः “प्रमादाद्विस्मृतं ज्ञात्वा प्रसाद्यैनं प्रयत्नतः । तर्पयित्वा यथान्यायं सर्वं तत् फलमश्नुते” । प्रमदाभावे तु नारायणः “एकस्मिन्नेनसि प्राप्ते ब्राह्मणो नियतः शुचिः । यतियान्द्रायणं कृत्वा तस्मात् पापात् प्रमुच्यते” यमः “आमन्त्रितस्तु यो विप्रो भोक्तुमन्यत्र गच्छति । नरकाणां शतं गत्वा चाण्डालेष्वभिजायते” । तत्रैव देवलः “पूर्वं निमन्त्रितोऽन्येन कुर्य्यादन्यप्रतिग्रहम् । भुक्ताहारोऽथ वा भुङ्क्ते सुकृतं तस्य नश्यति” । यदि विप्रो विलम्बेत तदोक्तमादित्यपुराणे “आमन्त्रितश्चिरं नैव कुर्य्याद्विप्रः कदाचन । देवतानां पितृणाञ्च दातुरन्नस्य चैव हि । चिरकारी भवेद्द्रोही पच्यते नरकाग्निना” । पृथ्वीचन्द्रोदये यमः “निमन्त्रितस्तु यो विप्रो ह्यध्वानं याति दुर्मतिः । भवन्ति पितरस्तस्य तं मासं पांशुभोजनाः । आमन्त्रितस्तु यः श्राद्धे हिंसां वै कुरुते द्विजः । पितरस्तस्य तं मासं भवन्ति रुधिराशनाः । आमन्त्रितस्तु यो विप्रो भारमुद्वहते द्विजः । पितरस्तस्य तं मासं भवन्ति स्वेदभोजनाः । निमन्त्रितस्तु यो विप्रः प्रकुर्य्यात् कलहं यदि । पितरस्तस्य तं मासं भवन्ति मलभोजनाः” । मत्स्यः “निमन्त्रितस्तु यः श्राद्धे मैथुनं सेवते द्विजः । श्राद्धं दत्त्वा च भुक्त्वा च युक्तः स्यान्महतैनसा” । ऋतावपि मैथुनं निषिद्धम् “ऋतुकाले नियुक्तो वा नैव गच्छेत् स्त्रियं क्वचित् । तत्र गच्छन्नवाप्नोति ह्यनिष्टानि फलानि तु” इति तत्रैव माधवीये च वृद्धमनूक्तेः “श्राद्धं करिष्यन् कृत्वा वा भुक्त्वा वापि निमन्त्रितः । उपोष्य च तथा भुक्त्वा नोपेयाच्च ऋतावपि । भोक्ष्यन् करिष्यन् श्वः श्राद्धं पूर्वरात्रौ प्रयत्नतः । व्यवायं भोजनञ्चापि ऋतावपि विवर्जयेत्” इति तत्रैवाश्वलायनोक्तेश्च । विज्ञानेश्वरेण तु श्राद्धे ऋतौ गच्छतोऽपि न दोष इत्युक्तम् तत्त्वगतिकत्वे ज्ञेयम् । बृहस्पतिः “द्विनिशं ब्रह्मचारी स्याच्छ्राद्धकृद्ब्राह्मणैः सह । अन्यथा वर्त्तमानौ तु स्यातां निरयगामिनौ । पुनर्भोजनमध्वानं भारमायासमैथुनम् । श्राद्धकृच्छ्राद्धभुक् चैव सर्वमेतद्विवर्जयेत् । स्वाध्यायं कलहञ्चैव दिवास्वापं तथैव च” । यत्तु श्राद्धकाशिकायां पुराणसमुच्चये “कृत्वा तु रुधिरस्रावं न विद्वान् श्राद्धमाचरेत् । एकं द्वे त्रीणि वा विद्वान् दिनानि परिवर्जयेत्” इति तन्निर्मूलम् । पृथ्वीचन्द्रोदये यमः “पुनर्भोजनमध्वानं भाराध्ययनमैथुनम् । सन्ध्यां प्रतिग्रहं होमं श्राद्धभोक्ताऽष्ट वर्जयेत्” । सन्ध्यानिषेधः प्रायश्चित्तात् पूर्वं ज्ञेयः यथाहोशनाः “दशकृत्वः पिबेदापो गायत्र्या श्राद्धभुक् द्विजः । ततः सन्ध्यामुपासीत जपेच्च जुहुयादपि” । गौड़ास्तु “सायं सन्ध्यां पराञ्च छेदनञ्च वनस्पतेः । अमावस्यां न कुर्वीत रात्रिभोजनमेव च । द्यूतञ्च कलहञ्चैव सायंसन्ध्यां दिवाशयम् । श्राद्धकर्त्ता च भोक्ता च पुनर्भुक्तिञ्च वर्जयेत्” कामधेनौ वराहाद्युक्तेः श्राद्धकर्त्तुरपि सायंसन्ध्यानिषेधमाहुः शिष्टास्तु निर्मूलत्वमाहुः । होमनिषेधस्तु स्वयंहोमविषयः “सूतके च प्रवासे च अशक्तौ श्राद्धभोजने । एवमादिनिमित्तेषु हावयेन्न तु हापयेत्” इति छन्दोगपरिशिष्टात् । तत्रैवादित्यपुराणे “निमन्त्रितस्तु न श्राद्धे कुर्य्याद्भार्य्यादिताड़नम्” । चन्द्रिकायां प्रचेताः “श्राद्धभुक् प्रातरुत्थाय प्रकुर्य्याद्दन्तधावनम् । श्राद्धकर्त्ता न कुर्वीत दन्तानां धावनं बुधः” हेमाद्रौ जाबालिः “दन्तधावनताम्बूले तैलाभ्यङ्गमभोजनम् । रत्यौषधपरान्नञ्च श्राद्धकृत् सप्त वर्जयेत्” । विष्णुरहस्ये “श्राद्धोपवासदिवसे खादित्वा दन्तधावनम् । गायत्र्या शतसम्पूतमम्बु प्राश्य विशुध्यति । पुनर्भोजनमध्वानं यानमायासमैथुनम् । दानप्रतिग्रहौ होमं श्राद्धभुक्